महापातकिनस्त्वेते यश्च तैः सह संवसेत् ॥
संवत्सरन्तु पतितैः संसर्गं कुरुते तु यः ।
यानशय्यासनैर्नित्यं जानन् स पतितो भवेत् ॥"
ननु द्वितीयतृतीयसंसर्गिणि प्रमाणं नास्ति अतएव वृद्धशातातपः ।
"अशुचिं संस्पृशेद्यस्तु एक एव स दुष्यति ।
तत्संस्पृष्टान्यो न दुष्येत सर्व्वद्रव्येष्वयं विधिः ॥"
तथा ।
"संहतानान्तु पात्राणां यद्येकमुपहन्यते ।
तस्य तत् शोधनं प्रोक्तं न तु तत्स्पर्शिनामपि ॥"
उच्यते । यश्च येन पापात्मनेति यो येन संविवेदिति संसर्गी येन संसर्गमिति विष्णुव्यासजावालवचनैः सामान्येन पापिष्ठसंसर्गी पापी भवति इति प्रतिपादनात् संसर्गपापिष्ठस्यापि संसर्गी पापयुक्तो भवतीति एभिरेव प्रतिपादितम् ॥*॥ पतितोत्पन्नानां शुद्धिमिच्छतां पतितानां प्रायश्चित्तस्य तृतीयो भागस्तत्प्रायश्चित्ते ज्ञेयम् । स्त्री च पतितोत्पन्ना तृतीयभागस्य तृतीयभागं कुर्य्यात् । इति प्रायश्चित्तविवेकः ॥

संसर्गाभावः, पुं, (संसर्गेण सम्बन्धेन अवच्छिन्नोऽभावः ।) सम्बन्धरहितत्वम् । न्यायमते अभावपदार्थविशेषः । स तु भेदभिन्नाभावः । स च त्रिविधः । प्रागभावः १ ध्वंसः २ अत्यन्ताभावः ३ । यथा,—
"अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥"
इति भाषापरिच्छेदः ॥*॥
भेदत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । विनाश्यभावत्वं प्रागभावत्वम् १ जन्याभावत्वं ध्वंसत्वम् २ नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम् ३ । इति सिद्धान्तमुक्तावली ॥

संसर्गी, [न्] (संसर्गोऽस्यास्तीति । इनिः । यद्वा, सं + सृज + "संपृचानुरुधेति ।" ३ । २ । १४२ । इति घिनुन् ।) संसर्गविशिष्टः । यथा । विभागानन्तरं मैत्र्यात् पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थानं संसर्गः । तद्युक्तः संसर्गी । एवम्भूतस्य संसर्गिणो मृतस्य धनं तज्जातस्यापत्यस्य तदपत्याभावे संसर्गी स्वयं गृह्णीयात् । इति दायतत्त्वम् ॥

संसर्पः, पुं, सम्यक्प्रकारेण गमनम् । सर्पादिगमनवद्गमनम् । संपूर्व्वसृपधातोर्घञ्प्रत्ययेन निष्पन्नः ॥

संसर्पी, [न्] त्रि, संसर्पशब्दादिन्प्रत्ययेन संपूर्व्वकसृपधातोर्णिन्प्रत्ययेन वा निष्पन्नः ॥ संसर्पविशिष्टः । सम्यग्गमनशीलः ॥ (यथा, रघुः । ७ । २६ ।
"कपोलसंसर्पिशिखः स तस्याः
मुहुर्त्तकर्णोत्पलतां प्रपेदे ॥")

संसारः, पुं, (संसरत्यस्मादिति । सं + सृ गतौ + घञ् ।) मिथ्याज्ञानजन्यवासना । इति नैयायिकाः ॥ यथा । संसारश्च मिथ्याधीप्रभवा वासना । इति प्रामाण्यवादगादाधरी टीप्पनी ॥ स्वादृष्टोपनिबद्धशरीरपरिग्रहः । इति कलापटीकायां गोपीनाथः ॥ संसरणम् । इति शब्दरत्नावली ॥ तत्पर्य्यायः । दुःखलोकः २ भवः ३ कष्टकारकः ४ । इति त्रिकाण्डशेषः ॥ अपिच ।
"अस्माद्विजायते विश्वमत्रैव प्रविलीयते ।
अमायी मायया बद्धः करोति विविधास्तनूः ॥
न चाप्ययं संसरति न च संसारयेत् प्रभुः ।
नायं पृथ्वी न सलिलं न तेजः पवनो न तत् ॥
न प्राणो न मनो व्यक्तं न शब्दः स्पर्श एव च ।
न रूपरसगन्धाश्च नाहं कर्त्ता न वागपि ॥
न पाणिपादौ नो पायुर्न चोपस्थो द्विजोत्तमाः ।
न कर्त्ता न च भोक्ता वा न च प्रकृतिपूरुषौ ॥
न माया नैव च प्राणश्चैतन्यं परमार्थतः ।
अहं कर्त्ता सुखी दुःखी कृशः स्थूलेति या मतिः
सा चाहङ्कारकर्तृत्वादात्मन्यारोप्यते जनैः ।
वदन्ति वेदविद्वांसः साक्षिणं प्रकृतेः परम् ॥
भोक्तारमक्षरं शुद्धं सर्व्वत्र समवस्थितम् ।
तस्मादज्ञानमूलोऽयं संसारः सर्व्वदेहिनाम् ॥"
इति कौर्म्मे ईश्वरगीतासु २ अध्यायः ॥
किञ्च ।
"पितृमातृसुहृद्भ्रातृकलत्रादिकृतेन च ।
कृष्टोऽसकृत्तया दैन्यमश्रुपूर्णाननो गतः ॥
एवं संसारचक्रेऽस्मिन् भ्रमता तात सङ्कटे ।
ज्ञानमेतन्मया प्राप्तं मोक्षसंप्राप्तिकारकम् ॥"
इति मार्कण्डेयपुराणे पितापुत्त्रसंवादनामाध्यायः ॥

संसारगुरुः, पुं, (संसारस्य गुरुः ।) कामदेवः । इति त्रिकाण्डशेषः ॥ जगद्गुरुश्च ॥

संसारमार्गः, पुं, (संसारस्य मार्गः ।) योनिः । इति त्रिकाण्डशेषः ॥

संसारमोचनं, त्रि, (संसारस्य मोचनं यस्मात् ।) भवतारकम् । यथा,—
"एवमेतन्महाख्यानं देवि ! संसारमोचनम् ।
मम भक्तव्यवस्थार्थं प्रयुक्तं परमं मया ॥"
इति वाराहे स्तुतस्वामिमाहात्म्यनामाध्यायः ॥*॥
(संसारस्य मोचनम् ।) भवमोचने, क्ली । तदुपाया यथा,—
वशिष्ठ उवाच ।
"संसारार्णवमग्नानां नराणामन्धचेतसाम् ।
तरणि यो भवेत् पोतस्तन्मे व्याख्यातुमर्हसि ॥
प्रह्लाद उवाच ।
ये शङ्खचक्राब्जकरं तु शार्ङ्गिणं
खगेन्द्रकेतुं वरदं श्रियः पतिम् ।
समाश्रयन्ते भवभीतिनाशनं
संसारगर्त्ते न पतन्ति ते पुनः ॥
वैकुण्ठं खण्डपरशुं भवबन्धसमुच्छिदम् ।
प्रणिपत्य महात्मानं संसारे न पुनर्भवेत् ॥
ध्यायेत् दामोदरं यस्तु भक्तिनम्रोऽर्च्चयेत वा ।
न स संसारगर्त्तेऽस्मिन् मज्जते दानवेश्वर ! ॥
ये मानवा विगतरागपरावरज्ञा
नारायणं सुरगुरुं सततं स्मरन्ति ।
ते धौतपाण्डुरपटा इव राजहंसाः
संसारसागरजलस्य तरन्ति पारम् ॥"
इति वामने ९० अध्यायः ॥

संसारी, [न्] पुं, (संसारोऽस्यास्येति । इनिः ।) संसारविशिष्टप्राणी । इति हलायुधः ॥ शरीरी । यथा । संसारिणामिति संसारित्वं शरीरित्वम् । शरीरित्वञ्च भोगावच्छेदकत्वं न तु चेष्टावत्त्वम् । अत ईश्वरपरिगृहीतरामकृष्णादिशरीरव्युदासः मिथ्याज्ञानजन्यवासनाया अदृष्टस्य वा न संसारपदेन विवक्षासम्भवः । इति बौद्धाधिकारस्य गादाधरी टिप्पनी ॥

संसिद्धिः, स्त्री, (सं + सिध + क्तिन् ।) प्रकृतिः । स्वभावः । इत्यमरः ॥ सम्यक्सिद्धिः । मदोत्था । इति मेदिनी ॥ परमा सिद्धिः । मोक्षः । यथा,
"मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥"
इति श्रीभगवद्गीतायां ८ अध्याये १५ श्लोकः ॥
(फलम् । इति स्वामी ॥ यथा, भागवते । १ । २ । १३ ।
"अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ।
स्वनुष्ठितस्य धर्म्मस्य संसिद्धिर्हरितोषणम् ॥")

संसृतिः, स्त्री, (सं + सृ + क्तिन् ।) संसारः ॥ इति शब्दरत्नावली ॥ (यथा, भागवते । १ । १ । १४ ।
"आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ।
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम् ॥")
प्रवाहः । इति त्रिकाण्डशेषः ॥

संसृष्टः, त्रि, (सं + सृज + क्तः ।) संसर्गः । वमनादिना संशुद्धः । इति मेदिनीकरहेमचन्द्रौ ॥ विभागानन्तरं मैत्र्यात् पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थानसंसर्गस्तद्युक्तः । अथ संसृष्टधनविभागः । एकपितृजातयोरपि सोदरविमातृजयोर्मृतदेयषट्पुरुषपिण्डदातृत्वेन सोदरस्यैव धनाधिकारो न तु पित्रादित्रयमात्रपिण्डदातुर्विमातृजस्य । क्वचित्तु संसृष्टत्वेन विमातृजस्याप्यसंसृष्टसोदरेण सह तुल्याधिकारिता सोदरस्य संसृष्टत्वे स एव गृह्णीयान्न संसृष्ट्यपि विमातृज इति । तथा च याज्ञवल्क्यः ।
"संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ।
दद्याच्चापहरेदंशं जातस्य च मृतस्य च ॥
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत् ।
असंसृष्ट्यपि चादद्यात् संसृष्टो नान्यमातृजः ॥"
संसृष्टिनमाह बृहस्पतिः ।
"विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः ।
पितृव्येणाथवा प्रीत्या स तु संसृष्ट उच्यते ॥"
तेन विभागानन्तरं मैत्र्यात् पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थानं संसर्गः तद्युक्तः संसर्गी । एवम्भूतस्य संसर्गिणो मृतस्य